# Shiva Nirvana Stotram

# શિવનિર્વાણસ્તોત્રમ્

## Document Information

Text title : shivanirvANastotram

File name : shivanirvANastotram.itx

Category : shiva, aShTottarashatanAmAvalI

Location : doc_shiva

Transliterated by : Ganesh Kandu kanduganesh at gmail.com

Proofread by : Ganesh Kandu kanduganesh at gmail.com, NA

Latest update : July 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 20, 2023

*sanskritdocuments.org*

# શિવનિર્વાણસ્તોત્રમ્

ૐ નમઃ શિવાય ।

ૐ જયત્યનન્યસામાન્યપ્રકૃષ્ટગુણવૈભવઃ ।
સંસારનાટકારમ્ભનિર્વાહણકવિઃ શિવઃ ॥ ૧॥

ૐ નમઃ શિવાય ભૂતભવ્યભાવિભાવભાવિને ।
ૐ નમઃ શિવાય માતૃમાનમેયકલ્પનાજુષે ।
ૐ નમઃ શિવાય ભીમકાન્તશાન્તશક્તિશાલિને ।
ૐ નમઃ શિવાય શાશ્વતાય શઙ્કરાય શમ્ભવે ।
ૐ નમઃ શિવાય નિર્નિકેતનિઃસ્વભાવમૂર્તયે ।
ૐ નમઃ શિવાય નિર્વિકલ્પનિષ્પ્રપઞ્ચસિદ્ધયે ।
ૐ નમઃ શિવાય નિર્વિવાદનિષ્પ્રમાણસિદ્ધયે ।
ૐ નમઃ શિવાય નિર્મલાય નિષ્કલાય વેધસે ।
ૐ નમઃ શિવાય પાર્થિવાય ગન્ધમાત્રસંવિદે ।
ૐ નમઃ શિવાય ષડ્રસાદિસામરસ્યતૃપ્તયે । ૧૦
ૐ નમઃ શિવાય તૈજસાય રૂપતાનિરૂપિણે ।
ૐ નમઃ શિવાય પાવનાય સર્વભાવસંસ્પૃશે ।
ૐ નમઃ શિવાય નાભસાય શબ્દમાત્રરાવિણે ।
ૐ નમઃ શિવાય નિર્ગલન્મલવ્યપાયપાયવે ।
ૐ નમઃ શિવાય વિશ્વસૃષ્ટિસૌષ્ટવૈકમીઢુષે ।
ૐ નમઃ શિવાય સર્વતઃ પ્રસારિપાદસમ્પદે ।
ૐ નમઃ શિવાય વિશ્વભોગ્યભાગયોગ્યપાણયે ।
ૐ નમઃ શિવાય વાચકપ્રપઞ્ચવાચ્ચવાચિને ।
ૐ નમઃ શિવાય નસ્યગન્ધસર્વગન્ધબન્ધવે ।
ૐ નમઃ શિવાય પુદ્ગલાલિલોલિકાપ્રશાલિને । ૨૦
ૐ નમઃ શિવાય ચાક્ષુષાય વિશ્વરૂપસન્દૃશે ।
ૐ નમઃ શિવાય સદ્ગુણત્રયાવિભાગભૂમયે ।

ૐ નમઃ શિવાય પૂરુષાય ભોક્તૃતાભિમાનિને ।
ૐ નમઃ શિવાય સર્વતો નિયન્તૃતાનિયામિને ।
ૐ નમઃ શિવાય કાલભેદકલ્પનોપકલ્પિને ।
ૐ નમઃ શિવાય કિઞ્ચિદેવકર્તૃતોપપાદિને ।
ૐ નમઃ શિવાય શુદ્ધવિદ્યતત્વમન્ત્રરૂપિણે ।
ૐ નમઃ શિવાય દૃક્ક્રિયાવિકસ્વરેશ્વરાત્મને ।
ૐ નમઃ શિવાય સર્વવિત્પ્રભો સદાશિવાય તે ।
ૐ નમઃ શિવાય વાચ્યવાચકાધ્વષટ્કભિત્તયે । ૩૦
ૐ નમઃ શિવાય વર્ણમન્ત્રસત્પદોપપદિને ।
ૐ નમઃ શિવાય પઞ્ચધાકલાપ્રપઞ્ચપઞ્ચિને ।
ૐ નમઃ શિવાય સૌરજૈનબૌદ્ધશુદ્ધિહેતવે ।
ૐ નમઃ શિવાય ભક્તિમાત્રલભ્યદર્શનાય તે ।
ૐ નમઃ શિવાય સર્વતો ગરીયસાં ગરીયસે ।
ૐ નમઃ શિવાય સર્વતો મહીયસાં મહીયસે ।
ૐ નમઃ શિવાય સર્વતઃ સ્થવીયસાં સ્થવીયસે ।
ૐ નમઃ શિવાય તુભ્યમઽસ્ત્વઽણીયસામઽણીયસે ।
ૐ નમઃ શિવાય મન્દરાદ્રિકન્દરાધિશાયિને ।
ૐ નમઃ શિવાય જાહ્નવીજલોજ્જ્વલાભજૂટીને । ૪૦
ૐ નમઃ શિવાય બાલચન્દ્રચન્દ્રિકાકિરીટિને ।
ૐ નમઃ શિવાય સોમસૂર્યવહ્નિમાત્રનેત્ર તે ।
ૐ નમઃ શિવાય કાલકૂટકણ્ઠપીઠસુશ્રિયે ।
ૐ નમઃ શિવાય ધર્મરૂપપુઙ્ગવધ્વજાય તે ।
ૐ નમઃ શિવાય ભસ્મધૂલિશાલિને ત્રિશૂલિને ।
ૐ નમઃ શિવાય સર્વલોકપાલિને કપાલિને ।
ૐ નમઃ શિવાય સર્વદૈત્યમર્દિને કપર્દિને ।
ૐ નમઃ શિવાય નિત્યનમ્રનાકિને પિનાકિને ।
ૐ નમઃ શિવાય નાગરાજહારિણે વિહારિણે ।
ૐ નમઃ શિવાય શૈલજાવિલાસને સુખાસિને । ૫૦
ૐ નમઃ શિવાય મન્મથપ્રમાથિને પુરપ્લુષે ।
ૐ નમઃ શિવાય કાલદેહદાહયુક્તિકારિણે ।
ૐ નમઃ શિવાય નાગકૃત્તિવાસસેઽપ્યઽવાસસે ।
ૐ નમઃ શિવાય ભીષણશ્મશાનભૂમિવાસિને ।

ॐ નમઃ શિવાય પીઠશક્તિપીઠકોપભેદિને ।
ॐ નમઃ શિવાય સિદ્ધમન્ત્રયોગિને વિયોગિને ।
ॐ નમઃ શિવાય સર્વદિક્ચતુર્નયાધિકારિણે ।
ॐ નમઃ શિવાય સર્વતીર્થતીર્થતાવિધાયિને ।
ॐ નમઃ શિવાય સાઙ્ગવેદતદ્વિચારચારવે ।
ॐ નમઃ શિવાય ષટ્પાદાર્થષોડશાર્થવાદિને । ૬૦
ॐ નમઃ શિવાય સાઙ્ખ્યયોગપાઞ્ચરાત્રપઞ્ચિને ।
ॐ નમઃ શિવાય ભોગ્યદાયિભોગ્યદાનતન્ત્રિણે ।
ॐ નમઃ શિવાય પારગાય પારણાય મન્ત્રિણે ।
ॐ નમઃ શિવાય પારપાર્થિવસ્વરૂપરૂપિણે ।
ॐ નમઃ શિવાય સર્વમણ્ડલાધિપત્યશાલિને ।
ॐ નમઃ શિવાય સર્વશક્તિવાસનાનિવાસિને ।
ॐ નમઃ શિવાય સર્વતન્ત્રવાસનારસાત્મને ।
ॐ નમઃ શિવાય સર્વમન્ત્રદેવતાનિયોઆગિને ।
ॐ નમઃ શિવાય સ્વસ્થિતાય નિત્યકર્મમાયિને ।
ॐ નમઃ શિવાય કાલકલ્પકલ્પિને સુતાલ્પને । ૭૦
ॐ નમઃ શિવાય ભક્તકાયસાખ્યદાય શમ્ભવે ।
ॐ નમઃ શિવાય ભૂર્ભુવઃસ્વરાત્મલક્ષ્યલક્ષિણે ।
ॐ નમઃ શિવાય શૂન્યભાવશાન્તરૂપધારિણે ।
ॐ નમઃ શિવાય સર્વભાવશુદ્ધશુદ્ધિહેતવે ।
ॐ નમઃ શિવાય ભાસ્વતે ।
ॐ નમઃ શિવાય ભર્ગ તે ।
ॐ નમઃ શિવાય શર્વ તે ।
ॐ નમઃ શિવાય ગર્વ તે ।
ॐ નમઃ શિવાય ખર્વ તે ।
ॐ નમઃ શિવાય પર્વ તે । ૮૦
ॐ નમઃ શિવાય રુદ્ર તે ।
ॐ નમઃ શિવાય ભીમ તે ।
ॐ નમઃ શિવાય વિષ્ણવે ।
ॐ નમઃ શિવાય જિષ્ણવે ।
ॐ નમઃ શિવાય ધન્વિને ।
ॐ નમઃ શિવાય ખડ્ગિને ।

ૐ નમઃ શિવાય ચર્મિણે ।

ૐ નમઃ શિવાય વર્મિણે ।

ૐ નમઃ શિવાય ભામિને ।

ૐ નમઃ શિવાય કામિને । ૯૦

ૐ નમઃ શિવાય યોગિને ।

ૐ નમઃ શિવાય ભોગિને ।

ૐ નમઃ શિવાય તિષ્ઠતે ।

ૐ નમઃ શિવાય ગચ્છતે ।

ૐ નમઃ શિવાય હેતવે ।

ૐ નમઃ શિવાય સેતવે ।

ૐ નમઃ શિવાય સર્વતઃ ।

ૐ નમઃ શિવાય સર્વશઃ ।

ૐ નમઃ શિવાય સર્વથા ।

ૐ નમઃ શિવાય સર્વદા । ૧૦૦

શિવ ભવ શર્વ રુદ્ર હર શઙ્કર ભૂતપતે
    ગિરિશ ગિરીશ ભર્ગ શશિશેખર નીલગલ ।
ત્રિનયન વામદેવ ગિરિજાધવ મારરિપો જય
    જય દેવ દેવ ભગવન્ ભવતેઽસ્તુ નમઃ ॥

એતામષ્ટોત્તરશતનમસ્કારસંસ્કારપૂતાં
    ભૂતાર્થવ્યાહૃતિનુતિમુદાહૃત્ય મૃત્યુઞ્જયસ્ય ।
કશ્ચિદ્વિદ્વાન્યદિહ કુશલં સઞ્ચિનોતિ સ્મ લોકે
    તેનાન્યેષાં ભવતુ પઠતાં વાઞ્છિતાર્થસ્યસિદ્ધિઃ ॥

ઇતિ શ્રીવ્યાસમુનિના વિરચિતં શિવનિર્વાણસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Ganesh Kandu kanduganesh at gmail.com, NA

*Shiva Nirvana Stotram*

pdf was typeset on July 20, 2023

Please send corrections to *sanskrit@cheerful.com*